सिद्ध अथ मृतसंजीवनीकवचम्

श्रीगणेशायनमः ॥

एवमाराध्य गौरिशं देवं मृत्युञ्जयेश्वरम् ।
मृतसञ्जीवनं नाम कवचं प्रजपेत् सदा ॥१॥
सारात् सारतरं पुण्यं गुह्याद् गुह्यतरं शुभम् ।
महादेवस्य कवचं मृतसंजीवनाभिधम् ॥२॥
समाहितमना भूत्वा श्रृणुष्व कवचं शुभम् ।
श्रुत्वैतद् दिव्यकवचं रहस्यं कुरु सर्वदा ॥३॥
जराभयकरो यज्वा सर्वदेवनिषेवितः ।

मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ॥४॥
दधानः शक्तिमभयां त्रिमुखः षड्भुजः प्रभुः ।
सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥५॥
अष्टादशभुजोपेतो दण्डाभयकरो विभुः ।
यमरूपी महादेवो दक्षिणस्यां सदाऽवतु ॥६॥
खड्गाभयकरो धीरो रक्षोगणनिषेवितः ।
रक्षोरूपी महेशो मां नैऋत्यां सर्वदाऽवतु ॥७॥
पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।
वरुणात्मा महादेवः पश्चिमे मां सदाऽवतु ॥८॥

गदाभयकरः प्राणनायकः सर्वदागतिः ।
वायव्यां मारूतात्मा मां शंकर पातु सर्वदा ॥९॥
शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।
सर्वात्मान्तरदिग्भागे पातु मां शंकरः प्रभु ॥१०॥
शूलाभयकरः सर्वविद्यानामधिनायकः ।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥११
उर्ध्वभागे ब्रह्मरूपी विश्वात्माऽधः सदाऽवतु ।
शिरो मे शंकरः पातु ललाटं चन्द्रशेखरः ॥१२॥
भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रोऽवतु लोचने ।

भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥१३॥
नासिकां मे महादेव ओष्ठौपातु वृषध्वजः ।
जिह्वां मे दक्षिणामूर्तिर्दन्तान्न् मे गिरिशोऽवतु ॥१४॥
मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः ।
पिनाकी मत्करौ पातु त्रिशुली ह्रिदयं मम ॥१५॥
पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभिं पातु विरूपाक्षः पार्श्वो मे पार्वतीपतिः ॥१६॥
कटिद्वयं गिरीशो मे पृष्ठं मे प्रमथाधिपः ।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥१७॥

जानुनी मे जगद्धर्ता जंघे मे जगदम्बिका ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥१८॥
गिरीशः पातु मे भार्यां भवः पातु सुतान् मम ।
मृत्युञ्जयो ममायुष्यं चित्तं मे गणनायकः ॥१९॥
सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥२०॥
मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ॥२१॥
यः पठेच्छृणुयानित्यं श्रावयेत् सुसमाहितः ॥

सोऽकालमृत्युं निर्जित्य सदायुस्यं समश्नुते ॥२२॥
हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।
आधयो ब्यधयस्तस्य न भवन्ति कदाचन ॥२३॥
कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादिगुणैस्वर्य लभते मानवोत्तमः ॥२४॥
युद्धारम्भे पठित्वेदमष्टाविंशतिवारकम् ।
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ॥२५॥
न ब्रह्मादीनी चास्त्राणी क्षयं कुर्वन्ति तस्य वै ।
विजयं लभते देवयुद्धमध्येऽपि सर्वदा ॥२६॥

प्रातरूत्थाय सततं यः पठेत् कवचं शुभम् ।
अक्षयं लभते सौख्यमिह लोके परत्र च ॥२७॥
सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः ।
अजरामरणो भूत्वा सदा षोडशवार्षिकः ॥२८॥
विचरत्यखिलाँल्लोकान् प्राप्य भोगांश्च दुर्लभान् ।
तस्मादिदं महागोप्यं कवचं समुदाहृितम् ॥२९॥
मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम् ॥३०॥

इतिमहर्षिवसिष्ठविरचितं मृतसञ्जीवन कवचं सम्पूर्णम्

कोटि,जन्मार्जितैपुण्यैः रन्यक्षत्रेषु मानवै ॥
पुरः पशुपति पुण्या लभ्यते मोक्षदा ध्रुवम् ॥१८॥
अण्डजोऽपि भवेद्विप्र स्तत्र देहान्तरे मुने ॥
चतुर्वर्गफलं प्राप्य गच्छति परमंपदं ॥१९॥
काशी मोक्ष मील्छ १ मात्र पशुपति धर्म १ अर्थ २ काम ३मोक्ष ४मील्छ ॥ पत्र ५१ त्रैलोक्यानां गरिष्ठोहं नेपाल इति सर्वतः ॥ द्वीपानां चैव सप्तानां जम्बू द्वीपो गरीयसः ॥२०॥ तास्मिश्चैव गरिष्ठं च वाराणसी स्थलं महत् ॥ तस्माच्चतुर्गु ज्ञेयं

श्रेष्ठं क्षेत्रं च कामदम् ॥२१॥ भुक्ति मुक्ति प्रदं साक्षात्पशुपतिस्थलं महत् ॥ चन्द्रभागा नदी पुण्या बाग्मति च महानदी ॥ तयोश्च संगमे तीर्थे पीतामहेति विश्रुतम् ॥४॥ दश गयासमं ज्ञेयं तद्भूमि स्पर्श मात्रतः ॥ पिण्डदानं शतगुणं तत्र चेद्विधिवत्त्वथा ॥५॥ हीमवत् खण्ड नेपाल महात्म्ये
गोकर्ण उत्तर वाहिनी उत्तर गया बाग्मतीअ०१४४पत्र२७२मंत्र ५

गोकर्णाख्यं महालिङ्गं भक्तनां च वरप्रदम् ॥ ब्रह्मणा स्थापितं पूर्वमेत-ल्लिङ्गं च हारिणम् ॥९॥ अ४०॥ तत्र पिण्डप्रदानाच्च त्रिसप्तं प्रोद्धरेत्कुलम् ॥ तथोत्तरगयातीर्थे स्नात्वा पिण्डं ददाति च ॥४॥ विशेषाद् भाद्रमावास्य तस्य पुण्यफलं श्रृणु ॥ मातुःपितुस्तया बन्धोः श्वसुरस्य कुलानि च ॥५॥ समुधृत्य शतं साग्रं पितृलोकं स गच्छति ॥ पितामह महातीर्थे स्नात्वा भक्त्याहि मानुषः ॥६॥ कोटिकुलं समुधृत्य ब्रह्म-लोकं प्रगच्छति ॥

यो विष्णुपादुकातीर्थे स्नात्वा पिण्डं ददाति च ॥७॥
त्रिसप्तकुलमुद्धृत्य विष्णुलोकं स गच्छति ॥ अ,६०॥
भाद्रमासे त्वमावास्या-तिथौ गोकर्णसन्निधौ ॥८॥
ये पिण्डां पातयिस्यन्ति तारयिस्यन्ति ते पितृं ॥ हि,,अ,
शंखमूलं महातीर्थं सर्वतीर्थोत्तमोत्तमम् ॥
महापातकिनो यत्र प्रमुच्यन्ते जलस्पृशः ॥९॥
रुद्रधारा च पातालगंगा ज्ञेयाऽघ-हारिणी ॥
मणिमतिस्तथा ज्ञेया व्योम- गंगा सुखप्रदा ॥१०॥
भागीरथी तथा श्रेष्ठा वाग्मति च महालदी ॥

शंखमूलं महातीर्थं त्रिगंगा संगमो यतः ॥११॥
हिःख१४५ तासां च संगमे तीर्थ शंखमूल मुदाह्रितम् ॥
तिस्रः कोटचर्ध-कोटीनां पवित्रं परमं कलौ ॥१२॥
शंखमूलसमं तीर्थं नास्ति नास्ति धरातले ॥
शतगंगासमं ज्ञेयं शंखमूलं माहाफलं ॥१३॥ हिःख८७
शंखमूलेतु-स्नानाय संकल्प्य गच्छतः पथि ॥
पदे पदे फलं तस्य वाजपेयाऽश्वमेधयोः ॥१४॥
हिःख८० नाहं स्वर्ग गमिष्यामि अपि तत्र महत्सुखम् ॥
एतत्क्षत्रं परित्यज्य कैलाशं गोपुरं तथा ॥१५॥

देव्याः परं रहःस्थानं तपोवनमिदं प्रियम् ॥
अहोरात्रे तपःसिद्धिरत्रान्यत्कोटिवर्षतः ॥१६॥ हिःख१६४॥
पशुपति नाम जप फल ॥